No. of Printed Pages/Questions:4/5

# O. P. JINDAL SCHOOL, SAVITRI NAGAR

**Periodic Test- 3** (Round-I) **(2025– 2026)**

**Class: X** **MM: 20**

**Subject: Sanskrit** **Time: 1. Hr.**

Name: ______________________ Class / Section: ________ Roll No.: __________

*General Instructions:- All questions are compulsory*

**प्र0 1 अधोलिखितम् गद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

(निम्नलिखित अनुच्छेद को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर लिखिए)

संस्कृत ग्रन्थेषु विविधाः वैज्ञानिकविषयाः प्राप्यन्ते।मेघदूते महाकविना कालिदासेन रचिते "धूमःज्योतिसलिलमरुताम्--" इत्यस्मिन् श्लोके मेघनिर्माणस्य विषयः वर्णितः वर्तते । कुमारसम्भवमहाकाव्ये मन्मथदहनसमये आलोकस्य गतिः शब्दगतितः अधिका इति वर्णिता । रघुवंशे चतुर्दशसर्गे चतुर्दशश्लोके चन्द्रसूर्ययोः ग्रहणविषये वर्णितः अस्ति । गणिते "पाइथागोरस" इति यः सिद्धान्तः अस्ति तस्य वर्णनम् बोधायनाचार्येण शूल्वसूत्राणि इति ग्रन्थे कृतमस्ति । महर्षि पराशरेण वृक्षायुर्वेदे वृक्षाणां पर्णैः क्रियमाणा प्रकाश निःसारणप्रक्रिया वर्णिता अस्ति । अतः संस्कृतग्रन्थानाम् अध्ययनं करणीयम् । यतः संस्कृतस्य महत्त्वप्रतिपादनाय उच्यते- "भारतस्य हितं संस्कृते निहितम्" इति ।

**अ. एकपदेन उत्तरत- ( केवलं प्रश्नद्वयम् )** **(½x2=1)**

i. मेघदूतं केन रचितम् ?

ii. चन्द्रसूर्ययोः ग्रहणविषये कुत्र वर्णितः ?

iii. कुत्र विविधाः वैज्ञानिकविषयाः प्राप्यन्ते

**आ. पूर्णवाक्येन उत्तरत- ( केवलं प्रश्नद्वयम् )** **(2x1=2)**

i वृक्षायुर्वेदे किं वर्णितम् अस्ति ?

ii. कुमारसम्भवकाव्ये किं वर्णितम् अस्ति ?

iii. संस्कृतस्य महत्त्वप्रतिपादनाय किम् उच्यते?

**ई. यथानिर्देशम् उत्तरत -** **(½x4=2)**

i. "विविधाः वैज्ञानिकविषयाः प्राप्यन्ते" इत्यस्मिन् वाक्ये विशेष्यपदं किम् ?

क. संस्कृतग्रन्थेषु ख. विविधाः ग. वैज्ञानिकविषयाः घ. सिद्धान्तः

ii. "पर्णैः क्रियमाणा प्रकाशनिःसारणप्रक्रिया" इत्यत्र विशेषणपदं किम् ?

क. पर्णैः ख. क्रियमाणाः ग .प्रकाशः घ. प्रकाशनिःसारणप्रक्रिया

(iii) 'संस्कृतग्रन्थेषु विविधाः वैज्ञानिकविषयाः प्राप्यन्ते ।' अत्र वाक्ये क्रियापदं किम् ?

क. संस्कृतग्रन्थेषु ख .विविधाः ग. वैज्ञानिकविषयाः घ. प्राप्यन्ते

(iv) 'अल्पा' इति पदस्य विलोमपदं गद्यांशे किम् अस्ति ?

(क) वर्णिता (ख) अधिका (ग) क्रियमाणा (घ) विविधाः

**प्र0 2 भवान् जितेन्द्रः। अमेरिकादेशस्य यात्रायाः वर्णनं कुर्वता स्वमित्रं शशाङ्कम् प्रति लिखितं पत्रं मञ्जूषातः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पत्रं पुनः लिखत। (½x10=5)**

दिल्लीतः

तिथिः : …………

प्रिय मित्र ! शशाङ्कः !

सस्नेहं (i)……….. ।

वयम् अत्र कुशलिनः। तत्रापि कुशलं कामये । अप्रैल मासस्य (ii)……….. तिथौ अहं iii)……… सह विमानेन अमेरिका देशम् iv) ………। आवाम् अधुना शिकागो नाम्नि नगरे स्वः। v)……….. अत्र रेलयानेन बसयानेन च यात्रां कुर्वः । जनाः अत्र स्वकर्तव्यं, vi)…………. च प्रति अतीव जागरूकाः सन्ति। अमेरिका तु अतीव vii)………….. देशः अस्ति । जनाः अवकरम् अवकरपात्रे एव क्षिपन्ति। दिसम्बरमासस्य सप्तम्यां तिथौ अहं स्वदेशम् आगमिष्यामि। आगत्य विस्तरेण वदिष्यामि। गृहे viii)………. मम नमस्काराः ।

भवतः ix)……….मित्रम्

x)……….

मञ्जूषा -

| |
|---|
| प्रियं , सुन्दरः, सर्वेभ्यः, अगच्छम्, आवाम्, स्वच्छताम्, एकादश्याम्, नमस्काराः, जनकेन, जितेन्द्रः |

**प्र0 3 मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखित-संवादं पुनः लिखत – (½x10=5)**

पद्मा – लते! अस्माकं आदिकाव्यं किम् अस्ति ?
लता – (i)……………………………………………।
पद्मा – रामायणस्य रचयिता कः अस्ति ?
लता – (ii)……………………………………………।
पद्मा – वाल्मीकि रामायणे कति श्लोकाः सन्ति ?
लता – (iii)……………………………………………।
पद्मा – रामायणे आदर्शपुरुषः कः अस्ति?
लता - (iv)……………………………………………।
पद्मा – रामायणे कति काण्डानि सन्ति ?
लता – (v)……………………………………………।
पद्मा – रामायणे कयोः द्वयोः काण्डयोः प्रक्षिप्त रचना अभवत्?
लता - (vi)……………………………………………।
पद्मा – रामायणे कस्य चरितं वर्णितम् ?
लता – मर्यदापुरुषोत्तमस्य (vii) …………………।
पद्मा – रामस्य पत्नी का आसीत् ?
लता – (viii) ……………………………।
पद्मा – कौ रामस्य पुत्रौ ?
लता – (ix) …………………………..।
पद्मा – लवकुशौ किम् अकुरुताम् ?

लता – (x) ........................ ।

**मञ्जूषा** –

( महर्षिः वाल्मीकिः , रामायणम् , श्रीरामः , चतुर्विंशतिसहस्रम् , बालकाण्डोत्तरकाण्डयोः , रामायणगानम् , लवकुशौ , सीता , श्रीरामस्य , सप्त )

**अथवा**

**प्र0 3 अधोलिखितां कथां मञ्जूषायाः शब्दसहायतया पूरयित्वा पुनः लिखत-**

वीरबालकः अभिमन्युः निजबलेन सह **(i)** ................ अगच्छत्। सः एकाकी एव चक्रव्यूहस्य प्रवेशद्वारस्य **(ii)**...................सफलोऽभवत् । साहसी बालकः **(iii)** ................ एव षट् प्रवेशद्वाराणि त्रोटयित्वा चक्रव्यूहस्य अन्तः प्राविशत् ।सप्तमे प्रवेशद्वारे तस्य सप्तमहारथिभिः सह घोरं युद्धं जातम्। **(iv)** ................ अतुल्यां बाणवृष्टिं दृष्ट्वा सर्वे **(v)** ................ मिलित्वा तस्योपरि युगपदेव **(vi)** ................ अकुर्वन्। एकतः एकाकी बालकः आसीत् अपरतः **(vii)** ............... सप्त महारथिनः। कुत्र गता **(viii)** ...................? चिरकालं **(ix)** ................ युद्धं कुर्वन् अन्ततः सः वीरः वीरगतिं प्राप्तः। धन्योऽयं **(x)** ................ ।

**मञ्जूषा** –

| |
|---|
| युद्धभूमिम् , युद्धकलानिष्णाताः , जायन्ते , महारथिनः , एकाकी , युद्धमर्यदा , यावत् , वीरबालकस्य , आक्रमणम् , भेदने , वीरबालकः |

**प्र04 मञ्जूषाप्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयित्वा अधोलिखितकथाम् उत्तरपुस्तिकायां लिखत –** **(½x6=3)**

अथ एकदा **(i)** _______ बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा **(ii)** _______ । बाल्यादेव स **(iii)** ______ विनयशीलः शास्त्रपारङ्गतः **(iv)**______ । असौ राजा **(v)** _______ प्रजाः पालयति स्म । स **(vi)** _______ समन्ततः धनधान्यसमृद्धाः दानशालाः अकारयत् । तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत-सुवर्णादिकानि अभीष्टानि वस्तूनि,प्राप्य सन्तुष्टोऽभवत् ।

| |
|---|
| चासीत् , वृद्धोपसेवी , नगरस्य , भगवान् , बभूव , पुत्रवत् , |

**प्र05 मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत – (½x4=2)**

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।

अभ्यासेन तु कौन्तय वैराग्येण च गृह्यते ।।

**अन्वयः**- महाबाहो ! (i)________ मनः तु (ii)___________चलम् । (iii)------------ ! ( एतत्)

अभ्यासेन वैराग्येण च (iv) __________।

**मञ्जूषा -**

| **गृह्यते, असंशयम् , कौन्तेय , दुर्निग्रहम्** |
|---|

**अथवा**

प्रार्थितं मया चक्रं देवदानव पूजितम् ।

अजेयः स्यामिति ते विभो ! सत्यमेतद् ब्रवीमि ते ।।

**भावार्थ**: - अश्वत्थामा श्रीकृष्णं वदति – हे विभो ! मया तव देवदानवपूजितं (i)_____ प्रार्थितम् यस्य प्रयोगेण अहम् (ii) ______ भवेयम् इति (iii) _____ तुभ्यं (iv) _____ कथयामि ।

**मञ्जूषा -**

| **अहम् , सत्यम् , अजेयः , चक्रम्** |
|---|